0961CH04

**चतुर्थः पाठः**

# कल्पतरुः

प्रस्तुतोऽयं पाठः **"वेतालपञ्चविंशतिः"** इति प्रसिद्धकथासङ्ग्रहात् सम्पादनं कृत्वा संगृहीतोऽस्ति। अत्र मनोरञ्जकघटनाभिः विस्मयकारिघटनाभिश्च जीवनमूल्यानां निरूपणं वर्तते। अस्यां कथायां पूर्वकालतः एव स्वगृहोद्याने स्थितकल्पवृक्षेण जीमूतवाहनः लौकिकपदार्थान् न याचते। अपितु सः सांसारिकप्राणिनां दुःखानि अपाकरणाय वरं याचते। यतो हि लोकभोग्याः भौतिकपदार्थाः जलतरङ्गवद् अनित्याः सन्ति। अस्मिन् संसारे केवलं परोपकारः एव सर्वोत्कृष्टं चिरस्थायि तत्त्वम् अस्ति।

अस्ति हिमवान् नाम सर्वरत्नभूमिः नगेन्द्रः। तस्य सानोः उपरि विभाति कञ्चनपुरं नाम नगरम्। तत्र जीमूतकेतुः इति श्रीमान् विद्याधरपतिः वसति स्म। तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः। स राजा जीमूतकेतुः तं कल्पतरुम् आराध्य तत्प्रसादात् च बोधिसत्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत्। सः जीमूतवाहनः महान् दानवीरः सर्वभूतानुकम्पी च अभवत्। तस्य गुणैः प्रसन्नः स्वसचिवैश्च प्रेरितः राजा कालेन सम्प्राप्तयौवनं तं यौवराज्ये अभिषिक्तवान्। कदाचित् हितैषिणः पितृमन्त्रिणः यौवराज्ये स्थितं तं जीमूतवाहनं उक्तवन्तः– "युवराज! योऽयं सर्वकामदः कल्पतरुः तवोद्याने तिष्ठति स तव सदा पूज्यः। अस्मिन् अनुकूले स्थिते सति शक्रोऽपि अस्मान् बाधितुं न शक्नुयात्" इति।

एतत् आकर्ण्य जीमूतवाहनः अचिन्तयत् – "अहो ईदृशम् अमरपादपं प्राप्यापि पूर्वैः पुरुषैः अस्माकं तादृशं फलं किमपि न प्राप्तम्। किन्तु केवलं कैश्चिदेव कृपणैः कश्चिदपि अर्थः अर्थितः। तदहम् अस्मात् कल्पतरोः अभीष्टं साधयामि" इति। एवम् आलोच्य सः पितुः अन्तिकम् आगच्छत्। आगत्य च सुखमासीनं पितरम् एकान्ते न्यवेदयत्– "तात! त्वं तु जानासि एव यदस्मिन् संसारसागरे आशरीरम् इदं सर्वं धनं वीचिवत् चञ्चलम्। एकः परोपकार एव अस्मिन् संसारे अनश्वरः यो युगान्तपर्यन्तं यशः प्रसूते। तद् अस्माभिः ईदृशः कल्पतरुः किमर्थं

© NCERT not to be republished

रक्ष्यते? यैश्च पूर्वैरयं 'मम मम' इति आग्रहेण रक्षितः, ते इदानीं कुत्र गताः? तेषां कस्यायम्? अस्य वा के ते? तस्मात् परोपकारैकफलसिद्धये त्वदाज्ञया इमं कल्पपादपम् आराधयामि।

अथ पित्रा 'तथा' इति अभ्यनुज्ञातः स जीमूतवाहनः कल्पतरुम् उपगम्य उवाच – "देव! त्वया अस्मत्पूर्वेषाम् अभीष्टाः कामाः पूरिताः, तन्ममैकं कामं पूरय। यथा पृथिवीम् अदरिद्राम् पश्यामि, तथा करोतु देव'' इति। एवंवादिनि जीमूतवाहने ''त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् तस्मात् तरोः उदभूत्।



क्षणेन च स कल्पतरुः दिवं समुत्पत्य भुवि तथा वसूनि अवर्षत् यथा न कोऽपि दुर्गत आसीत्। ततस्तस्य जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **हिमवान्** | हिमालयः | हिमालय | The Himalaya |
| **नगेन्द्रः** | पर्वतराजः | पर्वतों का राजा | King of mountains |
| **सानोः** | शिखरस्य | शिखर के, चोटी के | Of the mountain peak |
| **कुलक्रमागतः** | कुलक्रमाद् आगतः कुलपरम्परया सम्प्राप्तः | कुल-परम्परा से प्राप्त हुआ | Inherited |
| **यौवराज्ये** | युवराजपदे | युवराज के पद पर | Won the post of the crown prince |
| **शक्रः** | इन्द्रः | इन्द्र | Indra |
| **अर्थितः** | याचितः | माँगा | Begged |
| **अन्तिकम्** | समीपम् | पास में | Near |
| **वीचिवत्** | तरङ्गवत् | तरङ्ग की तरह | Like a tide |
| **अभ्यनुज्ञातः** | अनुमतः | अनुमति पाया हुआ | Permitted |
| **अदरिद्राम्** | दरिद्रहीनाम् | दरिद्रता से रहित अर्थात् सम्पन्न | Without poverty (f) |
| **दिवम्** | स्वर्गम् | स्वर्ग | To the heaven |
| **वसूनि** | धनानि | धन | Money |
| **उपगम्य** | समीपं गत्वा | पास में जाकर | Going near |
| **दुर्गतः** | दुर्गतिम् आपन्नः | पीड़ित, निर्धन | Caught by misfortune |
| **सर्वजीवानुकम्पया** | सर्वजीवेभ्यःकृपया | सभी जीवों के प्रति कृपा से | By kindness to All beings |
| **प्रथितम्** | प्रसिद्धम् | प्रसिद्ध हो गया | Became famous |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत-**

(क) जीमूतवाहनः कस्य पुत्रः अस्ति?

(ख) संसारेऽस्मिन् कः अनश्वरः भवति?

(ग) जीमूतवाहनः परोपकारैकफलसिद्धये कम् आराधयति?
(घ) जीमूतवाहनस्य सर्वभूतानुकम्पया सर्वत्र किं प्रथितम्?
(ङ) कल्पतरुः भुवि कानि अवर्षत्?

**2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**

(क) कञ्चनपुरं नाम नगरं कुत्र विभाति स्म?
(ख) जीमूतवाहनः कीदृशः आसीत्?
(ग) कल्पतरोः वैशिष्ट्यमाकर्ण्य जीमूतवाहनः किम् अचिन्तयत्?
(घ) हितैषिणः मन्त्रिणः जीमूतवाहनं किम् उक्तवन्तः?
(ङ) जीमूतवाहनः कल्पतरुम् उपगम्य किम् उवाच?

**3. अधोलिखितवाक्येषु स्थूलपदानि कस्मै प्रयुक्तानि?**

(क) **तस्य** सानोरुपरि विभाति कञ्चनपुरं नाम नगरम्।
(ख) राजा सम्प्राप्तयौवनं **तं** यौवराज्ये अभिषिक्तवान्?
(ग) **अयं** तव सदा पूज्यः।
(घ) तात! **त्वं** तु जानासि यत् धनं वीचिवच्चञ्चलम्।

**4. अधोलिखितानां पदानां पर्यायपदं पाठात् चित्वा लिखत -**

| | | | | | |
|---|---|---|---|---|---|
| (क) पर्वतः | – | ........................ | (ख) भूपतिः | – | ........................ |
| (ग) इन्द्रः | – | ........................ | (घ) धनम् | – | ........................ |
| (ङ) इच्छितम् | – | ........................ | (च) समीपम् | – | ........................ |
| (छ) धरित्रीम् | – | ........................ | (ज) कल्याणम् | – | ........................ |
| (झ) वाणी | – | ........................ | (ञ) वृक्षः | – | ........................ |

**5. 'क' स्तम्भे विशेषणानि 'ख' स्तम्भे च विशेष्याणि दत्तानि। तानि समुचितं योजयत-**

| **'क' स्तम्भ** | **'ख' स्तम्भ** |
|---|---|
| कुलक्रमागतः | परोपकारः |
| दानवीरः | मन्त्रिभिः |
| हितैषिभिः | जीमूतवाहनः |
| वीचिवच्चञ्चलम् | कल्पतरुः |
| अनश्वरः | धनम् |

© NCERT not to be republished

**6. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत–**

(क) **तरोः** कृपया सः पुत्रम् अप्राप्नोत्।
(ख) सः **कल्पतरवे** न्यवेदयत्।
(ग) **धनवृष्ट्या** कोऽपि दरिद्रः नातिष्ठत्।
(घ) कल्पतरुः **पृथिव्यां** धनानि अवर्षत्।
(ङ) **जीवानुकम्पया** जीमूतवाहनस्य यशः प्रासरत्।

**7. (क) "स्वस्ति तुभ्यम्" स्वस्ति शब्दस्य योगे चतुर्थी विभक्तिः भवति। इत्यनेन नियमेन अत्र चतुर्थी विभक्तिः प्रयुक्ता। एवमेव (कोष्ठकगतेषु पदेषु) चतुर्थी विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत–**

(क) स्वस्ति .......................... (राजा)
(ख) स्वस्ति .......................... (प्रजा)
(ग) स्वस्ति .......................... (छात्र)
(घ) स्वस्ति .......................... (सर्वजन)

**(ख) कोष्ठकगतेषु पदेषु षष्ठीं विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत–**

(क) तस्य .......................... उद्याने कल्पतरुः आसीत्। (गृह)
(ख) सः .......................... अन्तिकम् अगच्छत्। (पितृ)
(ग) .......................... सर्वत्र यशः प्रथितम् (जीमूतवाहन)
(घ) अयं .......................... तरुः? (किम्)

## योग्यताविस्तारः

यह पाठ **'वेतालपञ्चविंशतिः'** नामक कथा संग्रह से लिया गया है, जिसमें मनोरञ्जक एवम् आश्चर्यजनक घटनाओं के माध्यम से जीवनमूल्यों का निरूपण किया गया है। इस कथा में जीमूतवाहन अपने पूर्वजों के काल से गृहोद्यान में आरोपित कल्पवृक्ष से सांसारिक द्रव्यों को न माँगकर संसार के प्राणियों के दु:खों को दूर करने का वरदान माँगता है क्योंकि, धन तो पानी की लहर के समान चंचल है, केवल परोपकार ही इस संसार का सर्वोत्कृष्ट तथा चिरस्थायी तत्त्व है।

**(क) ग्रन्थ परिचय** – "वेतालपञ्चविंशतिका" पच्चीस कथाओं का संग्रह है। इस नाम की दो रचनाएँ पाई जाती हैं। एक शिवदास (13वीं शताब्दी) द्वारा लिखित ग्रन्थ है, जिसमें गद्य और पद्य दोनों विधाओं का प्रयोग किया गया है। दूसरी जम्भलदत्त की रचना है जो केवल गद्यमयी है। इस कथा में कहा गया है कि राजा विक्रम को प्रतिवर्ष कोई तांत्रिक सोने का एक फल

© NCERT not to be republished

देता है। उसी तांत्रिक के कहने पर राजा विक्रम श्मशान से शव लाता है। जिस पर सवार होकर एक वेताल मार्ग में राजा के मनोरञ्जन के लिए कथा सुनाता है। कथा सुनते समय राजा को मौन रहने का निर्देश देता है। कहानी के अन्त में वेताल राजा से कहानी पर आधारित एक प्रश्न पूछता है। राजा उसका सही उत्तर देता है। शर्त के अनुसार वेताल पुनः श्मशान पहुँच जाता है। इस तरह पच्चीस बार ऐसी ही घटनाओं की आवृत्ति होती है और वेताल राजा को एक-एक करके पच्चीस कथाएँ सुनाता है। ये कथाएँ अत्यन्त रोचक, भावप्रधान और विवेक की परीक्षा लेने वाली हैं।

**(ख) क्त क्तवतु प्रयोगः-**

**क्त** - इस प्रत्यय का प्रयोग सामान्यतः कर्मवाच्य में होता है।

**क्तवतु** - इस प्रत्यय का प्रयोग कर्तृवाच्य में होता है।

**क्त प्रत्ययः-**

- जीमूतवाहनः हितैषिभिः मन्त्रिभिः **उक्तः**।
- कृपणैः कश्चिदपि अर्थः **अर्थितः**।
- त्वया अस्मत्कामाः **पूरिताः**।
- तस्य यशः **प्रथितम्** (कर्तृवाच्य में क्त)

**क्तवतु प्रत्ययः-**

- सा पुत्रं यौवराज्यपदेऽ**भिषिक्तवान्**।
- एतदाकर्ण्य जीमूतवाहनः **चिन्तितवान्**।
- स सुखासीनं पितरं **निवेदितवान्**।
- जीमूतवाहनः कल्पतरुम् **उक्तवान्**।

**(ग) लोककल्याण-कामना-विषयक कतिपय श्लोक-**

- सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
  सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्।।
- सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु।
  सर्वः कामानवाप्नोतु, सर्वः सर्वत्र नन्दतु।।
- न त्वहं कामये राज्यं न स्वर्गं न पुनर्भवम्।
  कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्।।

**अध्येतव्यः ग्रन्थः**

वेतालपञ्चविंशतिकथा, अनुवादक, दामोदर झा, चौखम्भा विद्याभवन, वाराणसी, 1968

© NCERT not to be republished